**Code No.: MFLSG-05**

Total No. of Questions : 5 Total No. of Printed Pages : 2

# स्नातकोत्तरपरीक्षाः– २०१५

## एम्.ए. – विद्वदुत्तमा – प्रथमवर्षम्

## शास्त्रम् – संस्कृतसाहित्यम्

### भागः – २, पत्रिका – ५

### विषयः – स्वशास्त्रेतिहासः

**दिनाङ्कः –** 30.3.2015 **गरिष्ठाङ्काः – ८०**

**समयः –** 10.00 A.M. to 1.00 P.M. Max. Marks – 80

---

**I. एकेन वाक्येन उत्तरयत –** **10 × 1 = 10**

१. नाट्यशास्त्रम् अधिकृत्य अभिनवगुप्तपादैः किंनामकं व्याख्यानं कृतम्?

२. शतसाहस्री संहिता इति प्रसिद्धो ग्रन्थः कः?

३. मेघदूतं केन वृत्तेन उपनिबद्धम्?

४. सूर्यशतकं केन रचितम्?

५. वासवदत्ता इति गद्यकाव्यस्य कर्ता कः?

६. गुणाढ्यस्य कृतिः का?

७. 'यशोधनानां हि यशो गरीयः' इदं कस्य कवेः वचनम्?

८. गाथासप्तशती कया भाषया निबद्धा?

९. कस्य अलङ्कारस्य निबन्धनेन कालिदासः परां प्रसिद्धिमाप?

१०. किरातार्जुनीये पाकस्य कः प्रकारो वर्तते?

**II. त्रीणि विस्तरेण उत्तरयत –** **3 × 10 = 30**

१. रामायणस्य स्वरूपं निरूप्य तद्गतं वर्णनस्वारस्यं विशदयत।

२. भवभूतेः देशं कालं कृतिं चाधिकृत्य प्रबन्धं रचयत।

३. नाट्यशास्त्रे के के विषयाः निरूपिताः? प्रतिपादयत।

४. 'काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला' इत्युक्तिं समर्थयत।

५. संस्कृतसाहित्ये कवयित्रीणां स्थानं किम्? विशदयत।

**III.** चत्वारि संक्षेपेण उत्तरयत – **4 × 5 = 20**

१. भासकृतानां रूपकाणाम् एककर्तृकत्वस्य निर्णये कारणानि कानि?

२. नैषधीयचरितस्य वैशिष्ट्यं विशदयत।

३. 'महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते' इति वचनं महाभारते कथं सङ्गच्छते?

४. दूतकाव्येषु मेघदूतस्य वैशिष्ट्यं किम्? विशदयत।

५. दण्डिनो देशकालग्रन्थान् अधिकृत्य विवृणुत।

६. सुभाषितानि जीवने कथमुपयुक्तानि भवन्ति? सोदाहरणं स्फुटयत।

**IV.** त्रयाणां टिप्पणीं रचयत – **3 × 5 = 15**

१. बुद्धचरितम्

२. वेणीसंहारम्

३. भोजराजः

४. पञ्चतन्त्रम्

५. भारविः

**V.** चतुर्थं पदं लिखत – **5 × 1 = 5**

१. अभिज्ञानशाकुन्तलम् – नाटकम्, मृच्छकटिकम् – ____________।

२. बिल्हणः – विक्रमाङ्कदेवचरितम्, कल्हणः – ____________।

३. हर्षचरितम् – आख्यायिका, कादम्बरी – ____________।

४. बालचरितम् – भागवतावलम्बितम्, दूतघटोत्कचम् – ____________।

५. भारविः – अर्थगौरवम्, दण्डी – ____________।